# amarasanvAdaH Sanskrit Prayer Arati Collection

# અમરસંવાદઃ સંસ્કૃતારતયઃ

## Document Information

Text title : amarasa.nvaada Sanskrit Arati translated from Marathi

File name : sanskritaarati.itx

Category : AratI, misc, sanskritgeet

Location : doc_z_misc_general

Author : Vasant Shankar Nanivadekar

Transliterated by : N

Proofread by : N

Latest update : October 8, 2001

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# અમરસંવાદઃ સંસ્કૃતારતયઃ

॥ શ્રીઃ ॥

॥ સંસ્કૃતમ્ ભદ્રમણ્ડ્નમ્ ॥

॥ અમરસંવાદઃ ॥

(સંસ્કૃતારતયઃ)

દેવાનાં ભાષયા કુર્મહે દેવાનામ્ આરતિમ્ ।
ભક્ત્યા સહ સંસ્કૃતે સંસ્કૃતૌ વયમિચ્છામો રતિમ્ ॥

આરતિકારઃ વસન્તઃ શંકરસુતઃ નાનિવડેકરઃ ।

The Amarasanvada or Sanskrit Arati is a collection of prayers in Sanskrit by Mr. Vasant Shankar Nanivadekar. Some of these are translated from Marathi preserving the meaning, metre, tune, and context intact. Mr Nanivadekar has established an organization Sanskrit-Parimalam for promoting Sanskrit. It takes active part in teaching Sanskrit through publications and camps for children and adults.

He can be reached at

Mr. V. S. Nanivadekar
1/18 Goregaonkar Chawl,
Near Central Cinema,
Girgaon, Mumbai 400004 India

Nanivadekar Shahiri Sangam Prakashan
Mumbai, Shri Ganeshachaturthi, 29-8-1995
Publication Sanskrit Day, 10-8-1995 RakShabandhan

Fee: 10 Rupees (or commitment to read)

ચ્opyright The copyrights of the publication are with the author.

નીરાજના

અસ્માકં નાનિવડેકર-શાહિરિ-સંગમ-સંસ્થા
સંસ્કૃત-સેવા-પ્રકલ્પમ્ સંચાલયતિ સંસ્કૃત-પરિમલમ્ નામ ।
સંસ્કૃત-પરિમલ-પ્રકલ્પાન્તર્ગતાનિ સંસ્કૃતપરિમલ-શિબિરાણિ,
છાત્રજગતિ વિદ્યાર્થિપ્રિયાણિ સન્તિ । સંસ્કૃતમ્
અસ્માકમ્ સંસ્કૃતેઃ ભાષા, વિશ્વસ્ય સનાતની ભાષા ચ ।
તસ્યાઃ રુચિમ્ જનેષુ વૃદ્ધિમ્ નેતુમ્ અસ્માકમ્ પ્રયત્નાઃ ચલન્તિ ।

એતાદૃશેષુ પ્રયત્નેષુ અન્યતમઃ અયમ્ અપિ ‘દેવાનામ્ ભાષયા
દેવાનામ્ આરતીઃ’ ગાતુમ્ અમર-સંવાદઃ નામ કશ્ચિત્ યત્નઃ ।

એતાસુ આરતિષુ લોકેષુ પ્રચલિતાઃ સર્વજનવિદિતાઃ
ચ પૂર્વસૂરીણામ્ મરાઠી-હિન્દી-ભાષા-વિરચિતાઃ
આરતયઃ સંસ્કૃતવેષમ્ ધારયિત્વા અત્ર
યથા પ્રસ્તુતાઃ તથૈવ નવવિરચિતમ્ અપિ આરતિદ્વયમ્ વિદ્યતે ।
પુસ્તકે આવશ્યકતાનુસારમ્ સન્ધિરાહિત્યમ્ અનુસૃતમ્ અસ્તિ ।

અસ્માકં પૂર્વપ્રકાશનાનામ્ ઇવ અસ્ય અપિ પ્રકાશનસ્ય
સ્વાગતં સર્વત્ર સોત્સાહમ્ ભવેત્ ઇતિ આશાસ્મહે રાષ્ટ્રદેવસ્ય
ચરણયોઃચ પ્રસૂનમ્ ઇદમ્ ભક્તિપુરઃસરમ્ અર્પયામહે ।

મુમ્બયામ્ । શ્રીગણેશચતુર્થી ૨૯-૮-૧૯૯૫
સંસ્કૃતદિન-પ્રકાશનમ્ ૧૦-૮-૧૯૯૫ રક્ષાબન્ધનદિનમ્

વસન્તઃ શંકરસુતો નાનિવડેકરઃ ।
કાર્યવાહઃ
નાનિવડેકર-શાહિરી-સંગમસ્ય ।
૧/૧૮ ગોરેગાંવકર ચાળ,
સેણ્ટ્રલ-સિનેમા-સમીપમ્,
ગિરગાંવ, મુંબઈ ૪૦૦૦૦૪
નાનિવડેકર શાહિરી સંગમ પ્રકાશનમ્ ॥

॥ મૂલ્યમ્ દશ રૂપ્યકાણિ (અથવા પઠનમ્) ॥

ચ્opyright સર્વે અધિકારાઃ લેખકાધીનાઃ સન્તિ

(૧) ॥ શ્રી ગણપતેઃ આરતિઃ ॥

(મૂલમરાઠી- સુખકર્તા દુખહર્તા)

જય દેવ જય દેવ જય મંગલમૂર્તે ।
શ્રીમંગલમૂર્તે । જય મંગલમૂર્તે ।
દર્શનમપિ તે સકલાન્ કામાન્ પૂરયતે ॥ ધૃ.॥

॥ જય દેવ જય દેવ ॥

સૌખ્યકરો દુઃખહરો વાર્તામ્ વિઘ્નસ્ય
નિઃશેષયતિ ચ કુરુતે પ્રેમ કૃપા યસ્ય ।
સૈન્દૂરઃ સર્વાંગે સુન્દરલેપોઽસ્ય
કણ્ઠે વિલસતિ માલા મુક્તાનાં યસ્ય ॥ ૧॥

॥ જય દેવ જય દેવ ॥

સરત્ન-પિપ્પલપત્રં ગૌરીનન્દન તે
ચન્દનલેપઃ કેશર-કુંકુમ-યુક્તસ્તે ।
હીરક-મણ્ડિત-મુકુટં શીર્ષમલંકુરુતે
નૂપૂરે કિંકિણ્યઃ ક્વણન્તિ પદયોસ્તે ॥ ૨॥

॥ જય દેવ જય દેવ ॥

લમ્બોદર પીતાંબર ફણિવરબન્ધન હે
સરલશુણ્ડ હે વક્રતુણ્ડ (હે) ત્રીક્ષણ હે ।
દાસો રામસ્ય ત્વામ્ પ્રતીક્ષતે સ્વગૃહે
સંકટેષુ પાહિ ત્વં, નિર્વાણે રક્ષ ત્વં, સુરવરવન્દિત હે ॥ ૩॥

॥ જય દેવ જય દેવ ॥

॥ ૐ ગઁ ગણપતયે નમઃ ॥

(૨) ॥ શ્રીગજાનનસ્ય આરતિઃ ॥

(મૂલહિન્દી- જય જય જી ગણરાજ વિદ્યાસુખદાતા)

જય જય હે ગણરાજ, વિદ્યાસુખદાતઃ ।
ત્વદ્દર્શનધન્યોઽહમ્ ત્વત્પદ-રત-ચિત્તઃ ॥

॥ જય દેવ જય દેવ ॥ ધૃ.॥

સિન્દૂર-રક્તદેહમ્ સુભગમ્ ગજવદનમ્
વિલસત્-તુન્દિલકાયમ્ ગૌરીહર-તનયમ્ ।
ધૃત-ગુડલડ્ડુકહસ્તમ્ દેવેશ્વરનાથમ્
અવર્ણ્ય-ગુણમહિમાનમ્ પ્રાપ્તોઽહમ્ શરણમ્ ॥ ૧॥

અણિમાદિ-સિદ્ધયોઽષ્ટૌ દાસ્યો વિઘ્નારેઃ
સમર્થ-વિઘ્નહરસ્ય શ્રીમંગલમૂર્તેઃ ।
કોટિ-દિવાકર-સદૃશમ્ તવ તેજઃ પ્રખરમ્
ગણ્ડસ્થલ-મદશીર્ષમ્ વિહરત્ શશિભાલમ્ ॥ ૨॥

ભાવેન કોઽપિ ભક્ત્યા ત્વાં ગચ્છતુ શરણમ્
સન્તતિ-સમ્પત્-પ્રમુખમ્ વિન્દેત્ નિજમિષ્ટમ્ ।
એવમ્ મહારાજ ત્વમ્ રોચસેઽતિ મહ્યમ્
ગોસ્વામિનઃ સુતસ્ત્વામ્ ગાયતિ દિનરાત્રમ્ ॥ ૩॥

॥ જય જય ગણરાજ ॥

અભીપ્સિતાર્થસિદ્ધ્યર્થમ્ પૂજિતો યઃ સુરાસુરૈઃ ।
સર્વવિઘ્નહરસ્તસ્મૈ ગણાધિપતયે નમઃ ॥

---

(૩) ॥ શ્રી શંકરસ્ય આરતિઃ ॥

(મૂલ મરાઠી- લવથવતી વિક્રાળા)

જય દેવ જય દેવ શિવશંકર જય હે ।
ત્વામ્ કર્પૂરસુગૌરમ્ વયમ્ આર્તાઃ સ્તુમહે ॥ ધૃ.॥

॥ જય દેવ જય દેવ ॥

લમ્બન્તે વિકરાલા બ્રહ્માણ્ડે માલાઃ
વિષેણ કણ્ઠઃ શ્યામો વિલોચનાત્ જ્વાલાઃ ।
જહ્નોર્લાવણ્યયુતા શિરસિ ધૃતા બાલા
જલપ્રવાહો મન્દમ્ વહતિ યતિ વિમલઃ ॥ ૧॥

॥ જય દેવ જય દેવ ॥

મુગ્ધો વિશાલનયનઃ કર્પૂરસુગૌરઃ
અર્ધાંગિની ચ ગિરિજા ગલેઽસ્તિ સુમહારઃ ।
ઉદ્ધૂલનં વિભૂતેર્નીલઃ શિતિકણ્ઠઃ
એવમ્ વિલસતિ શંકર એષ ઉમાદયિતઃ ॥ ૨॥

॥ જય દેવ જય દેવ ॥

કૃતં સુરાસુરવૃન્દૈરમ્ભોધેર્મથનમ્
હાલાહલમ્ ચ સહસા તસ્માદ્ ઉદ્ભૂતમ્ ।
સહસા ત્વમ્ ચ સલીલમ્ કૃતવાન્ વિષપાનમ્
તતો નીલકણ્ઠ ઇતિ ત્વન્નામ પ્રથિતમ્ ॥ ૩॥

॥ જય દેવ જય દેવ ॥

વ્યાઘ્રામ્બરઃ ફણિધરઃ સુન્દર-મદનારિઃ
પંચાનનો મનોહર ઋષિજન-સુખકારી ।
શતકોટી-જપબીજે રામનામ્નિ રમતે
રઘુકુલતિલકો રામો રામદાસ-ચિત્તે ॥ ૪॥

॥ જય દેવ જય દેવ ॥

॥ ૐ નમઃ શિવાય ॥

ૐ ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ ।
ઉર્વારુકમિવ બન્ધનાન્મૃત્યોર્મુક્ષીય માઽમૃતાત્ ॥

---

(૪) ॥ શ્રી દુર્ગાયાઃ આરતિઃ ॥

(મૂલ મરાઠી- દુર્ગે દુર્ઘટ ભારી)

દુર્ગે સુદુર્ગમોઽસ્તિ ત્વદૃતે સંસારઃ
અનાથનાથે અમ્બે અસ્તુ કૃપાપ્રસરઃ ।
વારય વારય જનનમ્ મરણમ્ વારય મે
અસ્મિ વિપત્તિષુ પતિતો માતસ્તારય મે ॥ ૧॥

॥ જય દેવિ જય દેવિ ॥

જય દેવિ જય દેવિ મહિષાસુરમથિનિ ।
સુરવર-ઈશ્વર-વરદે સંજીવનિ તારિણિ ॥ ધૃ.॥

ત્રિભુવન-ભુવને નાઽન્યા ભજતે ત્વત્સામ્યમ્
વેદચતુષ્કમ્ શ્રાન્તમ્ ત્વામ્ સ્તોતુમ્ અશક્તમ્ ।
વિવદત્ પ્રવાહપતિતમ્ ષટ્શાસ્ત્રાધારમ્
કિન્તુ ત્વમ્ ભક્તેષુ પ્રસીદસિ ક્ષિપ્રમ્ ॥ ૨॥

॥ જય દેવિ જય દેવિ ॥

પ્રસન્ન-વદને દાસે પ્રસીદસિ ત્વરિતમ્
ક્લેશાન્ મોચય માતશ્છેદય ભવપાશમ્ ।
અમ્બે ત્વદૃતે કો મામ્ કુર્યાત્ પૂર્ણાશમ્
નરહરિ-મન આસ્તે તવ પદપંકજલીનમ્ ॥ ૩॥

॥ જય દેવિ જય દેવિ ॥

॥ જય જય દુર્ગે જગદમ્બે ॥ ભક્તાન્ તારય હે અમ્બે ॥

નમો દેવ્યૈ મહાદેવ્યૈ શિવાયૈ સતતં નમઃ ।
નમઃ પ્રકૃત્યૈ ભદ્રાયૈ નિયતાઃ પ્રણતાઃ સ્મ તામ્ ॥

(૫) ॥ શ્રી વિઠ્ઠલસ્ય આરતિઃ ॥

(મૂલ મરાઠી- યુગેં અઠ્ઠાવીસ)

જય દેવ જય દેવ, પાણ્ડુરંગ જય હે ।
રુક્મિણ્યા વલ્લભ હે, શ્રીરાહીવલ્લભ હે, પ્રસીદ મત્પ્રિય હે ॥

જય દેવ જય દેવ ॥ ધૃ.॥

તિષ્ઠત્યષ્ટાવિંશતિ યુગાનીષ્ટિકાયામ્
રુક્મિણી ચ વામાંગે, પશ્યત બહુશોભામ્ ।
પરબ્રહ્મ પુણ્ડલિકમ્ દ્રષ્ટમ્ સ્વયમ્ એતિ
વહતિ પદાભ્યામ્ ભીમા જગત્ સમુદ્ધરતિ ॥ ૧॥

॥ જય દેવ જય દેવ ॥

તુલસીમાલા-કણ્ઠમ્ કટિ-વિન્યસ્ત-કરમ્
ધૃતપીતામ્બર-વસનમ્ કસ્તૂરિલલાટમ્ ।
મિલિતુમ્ સુરવરદેવા આયાન્ત્યનુદિવસમ્
ગરુડો હનુમાન્ પુરતઃ તિષ્ઠન્તૌ નિત્યમ્ ॥ ૨॥

॥ જય દેવ જય દેવ ॥

ધન્યો વેણુરવોઽસૌ અનુક્ષેત્રપાલઃ
સુવર્ણકમલાનિ કણ્ઠે વનમાલા ।
રાહી ચ રુક્મિણી સા સકલા અપિ રાજ્ઞ્યઃ
શ્યામલ-વિઠ્ઠલરાજમ્ નીરાજયન્તિ તાઃ ॥ ૩॥

॥ જય દેવ જય દેવ ॥

આરતીશ્ચ ‘કુર્વણ્ડીઃ’ દર્શયિતુમ્ પ્રાપ્તાઃ
જલે ચન્દ્રભાગાયાઃ મુઞ્ચન્તે નનુ તાઃ ।
નૃત્યન્તિ ધ્વજહસ્તાસ્તે વૈષ્ણવભક્તાઃ
પણ્ઢરિ-કીર્તિ-સ્તવને રસનાઽપિ શ્રાન્તા ॥ ૪॥

॥ જય દેવ જય દેવ ॥

આષાઢી-કાર્તિક્યોર્મિલન્તિ ભક્તજનાઃ
જલે ચન્દ્રભાગાયાઃ સ્નાનમ્ કુર્વાણાઃ ।
દર્શન-કટાક્ષમાત્રમ્ મોક્ષમ્ આપ્નુવન્તિ
ભાવેન નામદેવઃ કેશવમ્ અર્ચયતિ ॥ ૫॥

॥ જય દેવ જય દેવ ॥

---

(૬) ॥ એહિ હે વિઠ્ઠલે ॥

(મૂલ મરાઠી- યેઈ હો વિઠ્ઠલે)

એહિ હે વિઠ્ઠલે સદયે શીઘ્રમ્ મમ માતઃ ।
પ્રતિપાલયતિ જનોઽયમ્ માતર્નિટિલ-નિહિતહસ્તઃ ॥ ધૃ.॥

ગચ્છતાઽઽગચ્છતા સાર્ધમ્ દદામિ સન્દેશમ્ ।
તિષ્ઠતિ પણ્ઢરપુર્યામ્ માતા પિતા સ મે નૂનમ્ ॥ ૧॥

સુભગમ્ પીતામ્બરમ્ ગગને પુષ્યતિ નિજશોભામ્ ।
ખગમારોહન્ ગરુડમ્ વિષ્ણુસ્ત્રાતુમ્ પ્રાપ્તો મામ્ ॥ ૨॥

નિત્યમ્ દીપાવલિરસ્માકમ્ વિઠ્ઠલસ્ય રાજ્યમ્ ।
વિષ્ણોર્દાસો નામા કુરુતે ભાવેનાઽર્તિક્યમ્ ॥ ૩॥

ભાવઃ સ્યાદ્ વા ન સ્યાદ્ અથવા મનસિ કિલાઽસ્માકમ્ ।

પણ્ઢરપુરપ્રભો હે સતતમ્ પશ્યાઽસ્માન્ સકૃપમ્ ॥ ૪॥

॥ વિઠ્ઠલે માતઃ ॥ ત્વમેવ મે તાતઃ ॥

॥ વિઠ્ઠલ વિઠ્ઠલ ॥ વત્સલ વત્સલ ॥

॥ પણ્ઢરીનાથ ॥ વિઠ્ઠલ વિઠ્ઠલ ॥

॥ નિવૃત્તે જ્ઞાનદેવ સોપાન અયિ મુક્તાઇ ॥

॥ એકનાથ નામદેવ તુકારામ ॥

॥ વિઠ્ઠલઽ વિઠ્ઠલઽ ॥ વદત રે ॥ વિઠ્ઠલઽ વિઠ્ઠલઽ ॥

॥ જ્ઞાનેશ્વર તુકારામ ॥ વદ જિહ્વે પાવનનામ ॥

---

(૭) ॥ શ્રીદત્તસ્ય આરતિઃ ॥

(મૂલ મરાઠી- ત્રિગુણાત્મક ત્રૈમૂર્તી)

જય દેવ જય દેવ દત્ત ગુરો જય હે ।
નષ્ટા મે ભવચિન્તા કૃતે તવાઽર્તિક્યે ॥

જય દેવ જય દેવ ॥ ધૃ.॥

ત્રિગુણાત્મકઃ ત્રિમૂર્તિઃ જ્ઞેયોઽયમ્ દત્તઃ
ત્રિગુણાત્મકાવતારઃ ત્રૈલોક્યત્રાતા ।
નેતિ ચ નેતિ ચ શબ્દૈઃ અનુમાનં ન ગતઃ
સુરવર-મુનિજન-યોગસમાધિઃ નાકલિતઃ ॥ ૧॥

॥ જય દેવ જય દેવ ॥

વ્યાપ્નોષ્યન્તર્બાહ્યમ્ દત્ત ત્વમ્ તત્ત્વમ્
વેત્તુ કથમ્ દુર્ભાગ્યો મહદ્ ઇદમ્ આશ્ચર્યમ્ ।
યતઃ પરાઽપિ નિવૃત્તા તત્ર ચ હેતુઃ કઃ
અભવત્ જન્મ-મરણયોઃ અન્તઃ શાશ્વતિકઃ ॥ ૨॥

॥ જય દેવ જય દેવ ॥

દત્તઃ પ્રીતો 'ભગવાન્' અવતીર્ણઃ પુરતઃ
ભક્ત્યાઽહમ્ તત્પુરતઃ સાષ્ટાંગમ્ પ્રણતઃ ।
આશીર્વાદઃ તેન પ્રસન્નેન દત્તઃ

જન્મ-મરણયોઃ સકૃપમ્ નાહિત આવાર્તઃ ॥

॥ જય દેવ જય દેવ ॥

'દત્ત' 'શ્રીદત્ત' ઇતિ ધ્યાનમ્ મમ ચિત્તે
તલ્લીનમ્ ભૂત્વા મે મન ઉન્મન આસ્તે ।
અસ્મદ્-યુષ્મદ્-ભાવો નિર્ગમનમ્ કુરુતે
'એકા' જનાર્દનગુરૌ શ્રીદત્તે રમતે ॥ ૪॥

॥ જય દેવ જય દેવ ॥

॥ શ્રીગુરુ શરણં મમ ॥ દત્તગુરુઃ શરણં મમ ॥

---

(૮) ॥ શ્રીરામસ્ય આરતિઃ ॥

(મૂલ મરાઠી- ઉત્કટ સાધુનિ)

નિજબોધ શ્રીરામ ત્વમ્ જય જય દેવ । જય જય જય દેવ ।
પરમાર્થેનાઽર્તિક્યમ્ સદ્ભાવેનાઽર્તિક્યમ્ । પૂરિતકામ તવ ।
જય દેવ જય દેવ । જય જય હે દેવ ॥ ધૃ.॥

સેતુમ્ બબન્ધ લબ્ધ્વા બૃહત્-શિલાખણ્ડાન્
લિંગદેહલંકાપુરમ્ ઉદ્ધ્વસ્તમ્ કૃતવાન્ ।
કામક્રોધાદીન્ તાન્ નિષૂદયન્ અસુરાન્
'દેહોઽહમ્'-મતિભાવમ્ દશવદનમ્ હતવાન્ ॥ ૧॥

॥ જય દેવ જય દેવ ॥

પ્રથમમ્ હનુમાન્ સીતામ્ અન્વષ્ટુમ્ ગતવાન્
લંકાદહનમ્ કૃતવાન્ અક્ષમ્ મારિતવાન્ ।
જમ્બુમાલિનમ્ હતવાન્ ભુવિ આસ્ફાલિતવાન્
આનન્દસ્ય સુવાર્તામ્ ગૃહ્ણન્ આગતવાન્ ॥ ૨॥

॥ જય દેવ જય દેવ ॥

સ્વબલેન ચ સ્વશક્તિઃ વિમોચિતા સીતા
અત આગચ્છદ્ અયોધ્યા-નગરમ્ રઘુનાથઃ ।
અવહત્ વિરક્તિપૂરે સાનન્દમ્ ભરતઃ
આરતિહસ્તાઽઽગચ્છત્ કૌસલ્યા માતા ॥ ૩॥

॥ જય દેવ જય દેવ ॥

સાનુહુતધ્વનયઃ પ્લવગા ગર્જન્તિ
અષ્ટાદશ-પદ્મમિતા બુભુઃ સ્મ કુર્વન્તિ ।
દશરથતનયોઽયોધ્યામ્ એષ સમાયાતઃ
આનન્દશ્ચ નગર્યામ્ અતીવ સંજાતઃ ॥ ૪॥

॥ જય દેવ જય દેવ ॥

સિંહાસને સલીલમ્ રઘુવીરો રાજા
‘તત્ત્વમ્’- ભાવસ્તસ્મૈ ઉપચારઃ પૂજા ।
સહજાનામ્ આર્તિક્યમ્ વાદ્ય-નિનાદોઽયમ્
માધવદાસ-સ્વામિન્ સ્મર, મા વિસ્મર તમ્ ॥ ૫॥

॥ જય દેવ જય દેવ ॥

॥ શ્રીરામ રઘુવીર ॥ જય જય રામ રઘુવીર ॥

---

(૯) ॥ શ્રીમારુતેઃ આરતિઃ ॥

(મૂલ મરાઠી- સત્રાણેં ઉડ્ડાણેં)

જય દેવ જય દેવ જય હનુમન્ જય હે ।
તવ પ્રસાદાત્ ક્વાઽપિ ન ભયમ્ કૃતાન્તાત્ મે ॥

જય દેવ જય દેવ ॥ ધૃ.॥

ઉડ્ડયનમ્ સાવેશમ્ મુખેન હુંકરણમ્
ભૂમણ્ડલમ્ સકમ્પમ્ નભોગમ્ ઉદધિજલમ્ ।
સનિનાદમ્ બ્રહ્માણ્ડમ્ સભયમ્ ત્રૈલોક્યમ્
સુરવર-નર-નક્તચરૈઃ પલાયનમ્ ચ કૃતમ્ ॥ ૧॥

॥ જય દેવ જય દેવ ॥

ન્યનદન્ પાતાલાનિ પ્રતિશબ્દો જાતઃ
ધરણીધરઃ સકમ્પઃ ખિન્નત્વમ્ પ્રાપ્તઃ ।
ગિરયઃ સર્વે ભગ્નાઃ ઉડુગણ ઉદ્ધ્વસ્તઃ
રામો રામદાસસ્ય ખલુ શક્તિસ્રોતઃ ॥ ૨॥

॥ જય દેવ જય દેવ ॥

॥ શ્રીરામં સંસ્મરામઃ ॥ શ્રીહનુમન્તં પ્રણમામઃ ॥

॥ વજ્રબલિન્ હનુમન્ અસ્તિ વિજયતે ॥ મનોજવન્ હનુમન્ અસ્તિ વિજયતે ॥

॥ મરુદ્વેગ હનુમન્ અસ્તિ વિજયતે ॥ વિજિતેન્દ્રિય હનુમન્ અસ્તિ વિજયતે ॥

॥ ધીમદ્વર હનુમન્ અસ્તિ વિજયતે ॥ વાતાત્મજ હનુમન્ અસ્તિ વિજયતે ॥

॥ કપિપ્રમુખ હનુમન્ અસ્તિ વિજયતે ॥ રામદૂત હનુમન્ અસ્તિ વિજયતે ॥

॥ મમ શરણ્ય હનુમન્ અસ્તિ વિજયતે ॥ જનશરણ્ય હનુમન્ અસ્તિ વિજયતે ॥

---

(૧૦) ॥ છત્રપતેઃ શ્રીશિવરાજસ્ય આરતિઃ ॥

જય જય જય શિવરાજ પુનસ્તે જયઘોષો ભવતાત્ ।
જયઘોષેણ સમમ્ રાષ્ટ્રેઽસ્મિન્ ચૈતન્યમ્ સ્ફુરતાત્ ॥ ધ્રુ. ॥

॥ જય જય જય શિવરાજ ॥

મહંમદીયૈઃ સમદૈર્ભારત-ભૂરિયમ્ આક્રાન્તા
આતંકાત્ ત્રાતુમ્ નાઽદૃશ્યત્ હિન્દૂનામ ત્રાતા ।
તદા ગૃહીતા ત્વયા 'ભવાની' સ્વકરે ખડ્ગલતા
યવનમર્દનમ્ કૃતમ્ જનેભ્યો દત્તા નિર્ભયતા ॥ ૧॥

અસ્માકમ્ પૂજાસ્થાનાનિ શ્રેષ્ઠ-મન્દિરાણિ
મૂર્તિભંજકૈઃ ક્રૂરૈર્યવનૈઃ સહસોદ્ધ્વસ્તાનિ ।
સમુચ્છ્રિત્ય ખલુ 'માવળ'-વીરૈઃ સ્વખડ્ગ-પત્રાણિ
તવાઽજ્ઞયા નિજદેશરિપૂણામ્ શિરાંસિ લૂનાનિ ॥ ૨॥

ખડ્ગમ્ તે નિષ્કોષિતમ્ આસીત્ આર્તત્રાણાર્થમ્
સ્ત્રી-ગો-વિપ્રાણામ્ અવનાર્થમ્ ઘોરમ્ વ્રતમ્ ધૃતમ્ ।
નિત્યમ્ અશ્વમ્ આરુહ્ય યતિતવાન્ સ્વરાજ્યનિર્મિતયે
પરિણત આસીત્ તવ સંકલ્પો ભવ્યરાષ્ટ્રવિજયે ॥ ૩॥

પ્રતિપચ્ચન્દ્રસમા વર્ધિષ્ણુઃ સર્વવિશ્વમાન્યા
ભદ્રકારિણી મુદ્રા તવ નૃપ શહાજિ-સુત ધન્યા ।
કર્તવ્ય-પ્રેરણામ્ ચ દદતી દિશતુ ચ નઃ સુપથમ્
શિવગુણકથને વાગ્ અસ્માકમ્ રમતામ્ અનવરતમ્ ॥ ૪॥

॥ ભારતમાતા વિજયતામ્ ॥ શ્રીશિવરાજો વિજયતામ્ ॥

॥ અસ્માકમ્ પૌરુષમ્ વિજયતામ્ ॥ શિવસંકલ્પો વિજયતામ્ ॥

---

(૧૧) ॥ શ્રી-અક્કલકોટ-સ્વામિનઃ આરતિઃ ॥ ૧

જય દેવ જય દેવ, સ્વામિન્ જય જય હે ॥ જગદ્ગુરો જય હે ॥

આર્તિક્યમ્ તવ પદયોઃ દાસોઽહમ્ કુર્વે ॥ જય દેવ જય દેવ ॥ ધૃ.॥

જન્મ ગૃહીત્વા માનવયોનૌ ગુરુવર્ય
પ્રીત્યા ભક્તત્રાણમ્ ત્વં કૃતવાન્ આર્ય ।
ઉત્તુંગભવ્યમૂર્તે દિવ્યપ્રભસૂર્ય
આજાનુબાહુમૂર્તે, હે સદ્ગુરુવર્ય ॥ જય દેવ જય દેવ ॥ ૧॥

ક્વ જન્મ જાતમ્ ક્વ ચ વા દીક્ષા તે જાતા
કસ્તે જનિતા, રત્નપ્રસવા વા માતા ।
ત્વમ્ ભક્તકામધેનુઃ નિત્યકૃપાચ્છાયા
જાનીયત્ ત્વામ્ જનનીમ્ કથમ્ અજ્ઞાસ્તનયઃ ॥ જય દેવ જય દેવ ॥ ૨॥

અક્કલકોટ-ગ્રામે નિવસસિ ભક્તાર્થમ્ (સાધ્વર્થમ્)
બાળાપ્પાઃ પ્રિયભક્તમ્ ત્વામ્ ગતવાન્ શરણમ્ ।
બહુશિષ્યેભ્યઃ કથયન્ ભક્તિરહઃસારમ્ (ભક્તેઃ સર્વસ્વમ્)
ઉધ્દૃતવાન્ પૂર્ણાશાન્ કૃત્વા લોકાઁસ્ત્વમ્ ॥ જય દેવ જય દેવ ॥ ૩॥

આત્માનમ્ મનુતે યઃ તવ શિષ્યમ્ ભક્તમ્
પરીક્ષસે દત્ત! ગુરો! તસ્યાઽન્તઃકરણમ્ ।
દર્શયસિ સ્વામ્ લીલામ્ યોગ્યતાનુસારમ્
નિશ્ચલભક્તિમ્ દૃષ્ટ્વા સ્વામિન્ તુષ્ટસ્ત્વમ્ ॥ જય દેવ જય દેવ ॥ ૪॥

મન્વાનઃ કલિકલુષાત્ ઇહયાત્રાપૂર્તિમ્
સમાધિમ્ અંગીકુર્વત્, ત્યજન્ ઇમામ્ જગતીમ્ ।
અમૃતમ્ ભવાન્ પ્રયચ્છતિ ભક્તેભ્યોઽદ્યાઽપિ
સ્વામિપદાભ્યામ્ રમતે ન ગણેશઃ ક્વાઽપિ ॥ જય દેવ જય દેવ ॥ ૫॥

॥ શ્રીસ્વામિન્ સમર્થ ॥ જય સ્વામિન્ સમર્થ ॥

---

(૧૨) ॥ શ્રી-અક્કલકોટ-સ્વામિનઃ આરતિઃ ॥ ૨

જય દેવ, જય દેવ જય નાથ, સ્વામિન્ ।
ત્રિભુવનનાથ અગમ્યા લીલા તે સ્વામિન્ ॥ ધૃ.॥ જય દેવ જય દેવ ॥

તવ દર્શનાત્ સુદૂરમ્ પ્રયાન્તિ પાપાનિ
સ્પર્શાત્ તથૈવ વિલયમ્ બત ભવદુરિતાનિ ।
શિરશ્ચરણયોઃ નત્વા સ્પષ્ટમ્ જ્ઞાતવ્યમ્
ઇતઃપરમ્ ન ભવેત્ કિલ વૈકુણ્ઠે સૌખ્યમ્ ॥ જય દેવ જય દેવ ॥ ૧॥

સુગન્ધકેશરતિલકઃ તથા શિરસ્ત્રધરઃ
કુણ્ડલશોભિતકર્ણો વક્ષઃસ્થિતહારઃ ।
ત્વત્પદશરેણભ્યઃ ખલુ કાલો ભયભીતઃ
સેવામહોત્સવમ્ તવ કુર્વન્તિ ચ ભક્તાઃ ॥ જય દેવ જય દેવ ॥ ૨॥

માનવશરીરધારી દૃષ્ટોઽસ્માભિઃ ત્વમ્
કૃતવાન્ અક્કલકોટે યતિવેષો વાસમ્ ।
અવતારમગૃહ્ણીથાઃ પૂર્ણબ્રહ્મ ત્વમ્
અવગચ્છતિ પરમ્ અજ્ઞો ભાવમ્ વિપરીતમ્ ॥ જય દેવ જય દેવ ॥ ૩॥

ત્વમ્ નિર્ગુણોઽવિકારો વ્યાપ્નોષિ હિ વિશ્વમ્
વ્યાપ્ય સ્થિરચરમ્ એકઃ સ્વામિન્ સ્થિતવાઁસ્ત્વમ્ ।
બહુમાયારૂપાણિ ત્વમ્ ધરસે નિત્યમ્
ત્વદ્ગુણવર્ણનકથને વિધિશબ્દૈઃ શ્રાન્તમ્ ॥ જય દેવ જય દેવ ॥ ૪॥

અનન્ત-જન્મસુ રાશિઃ સંચિતસુકૃતાનામ્
તેન હિ લાભો જાતો મે ગુરુચરણાનામ્ ।
સ્વર્ણસ્તબકે નિહિતમ્ પૂર્ણામૃતપાત્રમ્
પશ્ય કૃપાદૃષ્ટ્યા મામ્ શરણાગતદીનમ્ ॥ જય દેવ જય દેવ ॥ ૫॥

॥ શ્રીઅક્કલકોટ-સ્વામિન્ ॥ જય અક્કલકોટ-સ્વામિન્ ॥

(૧૩) ॥ માતૃભૂમેઃ આરતિઃ ॥

જયતુ માતૃભૂમિઃ મમ પુણ્યમ્ રાષ્ટ્રમ્ ।
તત્-સેવાયામ્ રમતામ્ સદૈવ મમ ચિત્તમ્ ॥ ધૃ.॥

॥ જયતુ રાષ્ટ્રમ્ ॥ પુણ્ય રાષ્ટ્રમ્ ॥

ઉદિતો યત્ર પ્રથમમ્ જ્ઞાનરવિઃ સાક્ષાત્
સર્વજ્ઞઃ પરમાત્મા શ્રુતિરૂપમ્ અગૃહ્ણાત્ ।
અન્વભવન્તો ધન્યા ઋષયો જ્ઞાનાર્કમ્
પૂતા સિન્ધુઃ દૃષ્ટ્વા જ્ઞાનરવેરુદયમ્ ॥ ૧॥

અધર્મ-પરિહારાર્થમ્, ધર્મ-રક્ષણાર્થમ્
સાધૂનામ્ અવનાર્થમ્, ખલનિર્દલનાર્થમ્ ।
પ્રેષયતિ સ્વાન્ દૂતાન્ પ્રભુરન્યત્ સ્થાનમ્
અત્ર સ્વયમ્, આગચ્છતિ ભગવાન્ સાનન્દમ્ ॥ ૨॥

દેવ-નિવાસાત્ નૂનમ્ પુણ્યા ભૂમિરિયમ્
ધન્યો યોઽસ્યા કુરુતે સ્વશિરસિ શુભરજસમ્ ।
પ્રભોઽસ્તુ ભૂમ્યામ્ અસ્યામ્ સુખમ્ પુનર્જનનમ્
વદને વિલસતુ સતતમ્ ભારત-ગુણગાનમ્ ॥ ૩॥

॥ જયતુ જયતુ ભારતદેશઃ ॥ સ એવ મે શ્રીપરમેશઃ ॥

॥ ભારતમાતા વિજયતામ્ ॥ વિજયતામ્ ભારતમાતા ॥

---

(૧૪) ॥ ભૂમૌ લુઠેયમ્ ॥

(મૂલ મરાઠી- ઘાલીન લોટાંગણ)

ભૂમૌ લુઠેયમ્, પદૌ નમેયમ્, નિરૂપયેયમ્ સ્વરૂપકમ્ ।
ત્વત્ સ્વરૂપકમ્ ।
પ્રીત્યાઽઽશ્લિષેયમ્, મુદાઽર્ચયેયમ્ નીરાજયેયમ્ નુતે નામા ॥

ત્વમેવ માતા ચ પિતા ત્વમેવ, ત્વમેવ બંધુશ્ચ સખા ત્વમેવ ।
ત્વમેવ વિદ્યા દ્રવિણં ત્વમેવ, ત્વમેવ સર્વમ્ મમ દેવ દેવ ॥ ૧॥

કાયેન વાચા મનસેન્દ્રિયૈર્વા, બુદ્ધ્યાઽઽત્મના વા પ્રકૃતિસ્વભાવાત્ ।
કરોમિ યદ્ યત્ સકલમ્ પરસ્મૈ નારાયણાયેતિ સમર્પયામિ ॥ ૨॥

અચ્યુતં કેશવં, રામ-નારાયણં, કૃષ્ણ-દામોદરં વાસુદેવં હરિમ્ ।
શ્રીધરં માધવં, ગોપિકાવલ્લભં જાનકીનાયકં રામચન્દ્રં ભજે ॥ ૩॥

હરે રામ, હરે રામ, રામ રામ, હરે હરે ।

હરે કૃષ્ણ, હરે કૃષ્ણ, કૃષ્ણ કૃષ્ણ, હરે હરે ॥ ૪॥

(૧૫) ॥ મન્ત્રપુષ્પાંજલિઃ ॥

ॐ યજ્ઞેન યજ્ઞમયજન્ત દેવાસ્તાનિ ધર્માણિ પ્રથમાન્યાસન્ ।
તે હ નાકં મહિમાનઃ સચંત । યત્ર પૂર્વે સાધ્યાઃ સંતિ દેવાઃ ॥

ॐ રાજાધિરાજાય પ્રસહ્યસાહિને । નમો વયં વૈશ્રવણાય
કુર્મહે । સ મે કામાન્ કામકામાય મહ્યં કામેશ્વરો વૈશ્રવણો
દદાતુ । કુબેરાય વૈશ્રવણાય મહારાજાય નમઃ ।
ॐ સ્વસ્તિ સામ્રાજ્યં ભૌજ્યં સ્વારાજ્યં વૈરાજ્યં પારમેષ્ઠ્યં
રાજ્યં માહારાજ્યમાધિપત્યમયં સમંતપર્યા ઈસ્યાત્
સાર્વભૌમઃ સાર્વાયુષ આંતાદાપરાર્ધાત્ । પૃથિવ્યૈ
સમુદ્રપર્યંતાયા એકરાળિતિ । તદપ્યેષશ્લોકોઽભિગીતો
મરુતઃ પરિવેષ્ટારો મરુત્તસ્યાવસન્ ગૃહે ।
આવિક્ષિતસ્ય કામપ્રેર્વિશ્વેદેવાઃ સભાસદ ઇતિ ॥

શ્લોકાઃ
એકદન્તાયવિદ્મહે । વક્રતુણ્ડાય ધીમહિ ।
તન્નો દન્તી પ્રચોદયાત્ ।

વાગર્થાવિવ સમ્પૃક્તૌ વાગર્થપ્રતિપત્તયે ।
જગતઃ પિતરૌ વન્દે પાર્વતી પરમેશ્વરૌ ॥

રામાય રામભદ્રાય રામચન્દ્રાય વેધસે ।
રઘુનાથાય નાથાય સીતાયાઃ પતયે નમઃ ॥

વસુદેવસુતં દેવં કંસચાણૂરમર્દનમ્ ।
દેવકીપરમાનન્દં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥

અપિ સ્વર્ણમ્યી લંકા ન મે લક્ષ્મણ રોચતે ।
જનની જન્મભૂમિશ્ચ સ્વર્ગાદપિ ગરીયસી ॥

પ્રેરકમન્ત્રો એક એવ 'ॐ રાષ્ટ્રાય સ્વાહા' ।
' રાષ્ટ્રાય સ્વાહા' - 'રાષ્ટ્રાય ઇદં ન મમ' ॥

ॐ

॥ સંસ્કૃતાષ્ટકમ્ ॥

અગ્રતઃ સંસ્કૃતં મેઽસ્તુ પૃષ્ઠતો મેઽસ્તુ સંસ્કૃતમ્ ।
સંસ્કૃતં હૃદયે મેઽસ્તુ વિશ્વમધ્યેઽસ્તુ સંસ્કૃતમ્ ॥ ૧॥

સંસ્કૃતં દેવભાષાઽસ્તિ વેદભાષાઽસ્તિ સંસ્કૃતમ્ ।
પ્રાચીન-જ્ઞાન-ભાષા ચ સંસ્કૃતં ભદ્રમણ્ડનમ્ ॥ ૨॥

વેદાન્તાનાં પુરાણાનાં શાસ્ત્રાણાં ચ તથૈવ ચ ।
મંત્રાણાં તંત્રસૂત્રાણામ્ આદ્યભાષાઽસ્તિ સંસ્કૃતમ્ ॥ ૩॥

રામાયણં મહાકાવ્યં મહાભારતમેવ ચ ।
ઉભે ચ વિશ્વવિખ્યાતે સંસ્કૃતસ્ય મહાનિધી ॥ ૪॥

ભાસસ્ય કાલિદાસસ્ય ભવભૂતેશ્ચ વિશ્રુતા ।
બાણ-શૂદ્રક-હર્ષાણામ્ કાવ્યભાષાઽસ્તિ સંસ્કૃતમ્ ॥ ૫॥

પ્રાણભૂતં ચ યત્તત્ત્વં સારભૂતં તથૈવ ચ ।
સંસ્કૃતૌ ભારતસ્યાઽસ્ય તન્મે યચ્છતુ સંસ્કૃતમ્ ॥ ૬॥

યત્ર રામકથાગાનમ્ તત્રાઽસ્તે હનુમાન્ યથા ।
સંસ્કૃતાધ્યયનં યત્ર તત્ર સંસ્કૃતિદર્શનમ્ ॥ ૭॥

શ ૃણુમઃ સંસ્કૃતં નિત્યં વદામઃ સંસ્કૃતં તથા ।
સ્મરામઃ સંસ્કૃતં નિત્યં પઠામઃ સંસ્કૃતં તથા ॥ ૮॥

॥ જયતુ સંસ્કૃતમ્ ॥ જયતુ સંસ્કૃતિઃ ॥

॥ જયતુ અમરસંસ્કૃતારતિઃ ॥

ચ્opyright Copyrights are with the composer Mr. Vasant Shankar Nanivadekar

*amarasanvAdaH Sanskrit Prayer Arati Collection*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*